कारणकत्वाद्भिन्न इति यथोक्तं प्रकाशिकायाम् । “शब्दो यदि स्वार्थस्यानुभवे भवेद्धेतुस्तर्हि प्रात्यक्षिकवौपनायिके, तत्र नाकाङ्क्षाद्युपयोगः, तद्भिन्ने चेदानुमानिक एव न च तत्र सद्यः, साकाङ्क्षत्वादिधीमात्रेण, व्याप्तिबोधस्याप्यधिकस्यापेक्षणादित्याशङ्कामपनेतुमन्वयबोधनामकमनुभवान्तरं दर्शयति । “साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः । सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा” । शाब्दधियः प्रत्यक्षत्वाभ्युपगमे प्रत्यक्षादिसामान्यं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वासम्भवात्, शाब्दान्यप्रत्यक्षत्वाद्यवच्छिन्नं प्रति तस्यास्तथात्वमपेक्ष्य शाब्दधियः प्रत्यक्षाद्भिन्नत्वकल्पनायामेव लाघवाच्च । लिङ्गजन्यत्वेनान्वयबुद्धेरनुमितित्वसिद्धावनायत्त्या शाब्दान्यानुमित्यां तत्सामग्र्याः प्रतिबन्धकत्वं वाच्यमतो लिङ्गजत्वमेव शाब्दधियः खण्डयति ।“योग्यतार्थगताऽऽकाङ्क्षा शब्दनिष्ठाऽनुभाविका । प्रत्येकं वा मिलित्वा वा नैते लिङ्गमसिद्धितः” । गवादावस्तित्वादेरनुभवार्थं न तावदस्तित्वबाधविरहरूपं लिङ्गं बाधनिश्चयाभावेनान्यथासिद्धस्य योग्यतानिश्चयस्यानावश्यकत्वात् योग्यतामात्रलिङ्गकसंसर्गानुमानस्यान्वयबुद्धित्वे घटः कर्म्मत्वमित्यादिस्थलीयस्यापि तस्य तथात्वापाताच्च । योग्यतायाः संशयस्थलेऽप्यन्वयबुद्धेरानुभविकत्वात् । गवादावस्तित्वादेरन्वयबोधानुकूलानुपूर्व्वीपर्य्यवसितात्वाकाङ्क्षा स्वयमसिद्धा कथमस्तित्वाद्यन्वयबोधं साधयेत् तत्र गवास्तित्वादेर्योग्यताविशिष्टमप्याकाङ्क्षावत्त्वं न तदन्वयस्यानुमापकप्रसिद्धेरित्यादि” ।

**अन्वयिन्** त्रि० अन्वेति अनु–इण–णिनि । शाब्दबोधोपयोगिसंबन्धवति अनुगते च अन्वयः वंशादिः अस्त्यस्य इनि । प्रागुक्तान्वयवति स्त्रियां ङीप् । न्यायनये अन्वयव्याप्तियुक्ते हेतौ पु० ‘केवलान्वयी” ।

**अन्वर्थ** त्रि० अनुगतोऽर्थम् अत्या०स० । अर्थानुगते व्युत्पत्तियुक्ते शब्दे “तथैव सोऽभूदन्वर्थः राजा प्रकृतिरञ्जनादिति” रघुः ।

**अन्ववसर्ग** पु० अनु+अव+सृज–घञ् अनुगतोऽवसर्गमिच्छानुरूपप्रचारम्, अत्या०स०, अनुरूपं स्वेच्छानुरूपतया अवसृज्यते न प्रतिरुध्यते अनेन इति वा अनु+अव+सृज–घञ् । यथेष्टं क्रियतामित्येवं रूपायामनुज्ञायाम् कामाचारानुज्ञाने, ‘अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु” पा० अपि सिञ्च अपि स्तुहि इत्यादौ यथेष्टं कुर्य्या इत्याद्यर्थोऽपिना द्योत्यते न तु कुत्रापि अनुज्ञया प्रतिरोधः क्रियते इति तस्य तथात्वम् ।

**अन्ववाय** पु० अन्ववाय्यते उत्पत्त्यानुसंबध्यते अनु+अव+अय–घञ्, इण्–अच् वा अनुन्ववेति अनुगच्छति देहावयवम् अनु+अव+इण्–कर्त्तरि अच् वा । वंशे, सन्ताने च ।

**अन्वयव्यतिरेकिन्** त्रि० अन्वयव्यतिरेकौ स्तोऽस्य इनि । साध्यसाधके हेतुविशेषे, यथा वह्निसाधने धूमः । स हि वह्निमति महानसादौ, वह्न्यभाववति जलादौ च भावाभावाभ्यां वह्नेरन्वयव्याप्तेः व्यतिरेकव्याप्तेश्च तथेति न्यायमते प्रसिद्धम् । अन्वयोऽन्वयव्याप्तिर्व्यतिरेको व्यतिरेकव्याप्तिस्तौ विद्येते अस्य इनि । अन्वयव्याप्तिमति व्यतिरेकव्याप्तिमति च हेतौ । यथा वह्नौ साध्ये धूमस्य अन्वयव्यतिरेकव्याप्तिकत्वम् । तत्र च धूमसत्त्वे वह्निसत्त्वरूपान्वयव्याप्तिः वह्निव्यतिरेके च धूमाभावः व्यतिरेकव्याप्तिरित्युभयव्याप्तिसत्त्वात्तथात्वम् ।

**अन्वयव्याप्ति** स्त्री अन्वयेन व्याप्तिर्व्यापनं नियततया स्थितिः ३त० । यत्र धूमस्तत्र वह्निरित्येवं रूपायां व्याप्तौ । अन्वयेन तस्य सत्त्वेन व्याप्तिः इतरान्वयस्य साध्यस्यान्वयः व्यापकता । यथा धूमसत्त्वेन वह्निसत्ता इत्यतोधूमसत्त्वेन वह्नेर्व्यापकता । सा च साध्यसामानाधिकरण्यरूपा ।

**अन्वयागत** त्रि० अन्वयात् वंशपरम्परायाः आगतः । दायप्राप्ते धनादौ “श्रुतं शौर्य्यं तपःकन्याशिष्ययाज्यान्वयागतम् धनं सप्तविधं शुद्धमिति” नारस० ।

**अन्ववेक्षा** स्त्री अनु+अव+ईक्ष–अङ् । अपेक्षायामनुरोधे ।

**अन्वष्टका** स्त्री अनुगतोऽष्टकाम् । श्राद्धकालभेदे स च अग्रहायण्या ऊर्द्धं तिस्रः कृष्णाष्टम्यः अष्टकाः, तदुत्तरवर्त्तिन्यस्तिस्रः कृष्णनवम्यः तद्रूपः । तास्च साग्निकस्य मात्रादिश्राद्धकालः । तथाहि “अष्टका योर्द्ध्वमाग्रहायण्यास्तमिस्राष्टमीति” गोभि० । “पितृदानाय मूले स्युरष्टकास्तिस्र एव च कृष्णपक्षे वरिष्ठाश्चेति” ब्रह्मपु० । आश्वलायनगृह्ये तु ताश्चतस्र इत्युक्तम् यथा । हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका” इति । “एकस्यां चतसृषु वेति” विकल्पश्रवणात् सामर्थ्यभेदेन एकस्यां तिसृषु चतुर्षु वा अष्टकाश्राद्धम् अन्वष्टकाश्राद्धं च कार्य्यमिति गम्यते । तत्र पशुकल्पस्थालीपाकाद्यङ्गजातमुक्त्वा “अपरेद्युरान्वक्यमिति” सूत्रेण तदुत्तरवर्त्तिकृष्णनवमीषु तद्विहितम् तच्च मात्रादिभ्योऽपि देयम् “पितृभ्यश्च हुत्वा मन्यवर्ज्जम् स्त्रीभ्यश्च सुराचाममिति” तत्रैवोक्तेः मनुनाऽपि “पितृं श्चैवाष्टकास्वर्चेन्नित्यमन्वष्टकासु” चेत्युक्तम् अत्र पितृपदमष्टकापक्षे स्वपरम्, अन्वका-